शैवलबलाहकाभं परुषं पीतप्रभं प्रभाहीनम् ।
मलिनद्युतिं विवर्णं दूरात् परिवर्जयेत् प्राज्ञः ॥
मूल्यं प्रकल्पमेषां विबुधवरैर्देशकालविज्ञानात् ।
दूरे भूतानां बहु किञ्चिन्निकटप्रसूतानाम् ॥”

इति गारुडे भीष्मरत्नपरीक्षा नाम ७६ अः ॥

भीष्मसूः, स्त्री, (भीष्मं सूते प्रसूते इति । सू प्रसवे + क्विप् ।) गङ्गा । इत्यमरः । १ । १० । ३१ ॥

भीष्माष्टमी, स्त्री, (भीष्मस्य अष्टमी भीष्मनाम्निका अष्टमी वा ।) माघशुक्लाष्टमी । तत्र भीष्मस्य तर्पणादिकं कर्त्तव्यम् । यथा, भविष्योत्तरे ।
“शुक्लाष्टम्यान्तु माघस्य दद्याद्भीष्माय यो जलम् ।
संवत्सरकृतं पापं तत्क्षणादेव नश्यति ॥”
धवलधृता स्मृतिः ।
“अष्टम्यान्तु सिते पक्षे भीष्माय तु तिलोदकम् ।
अमन्त्र विधिवद्दद्युः सर्व्वे वर्णा द्विजातयः ॥”
सर्व्वे वर्णा इत्युपादानात् ब्राह्मणशूद्रयोरप्यधिकारः । द्विजातय इति सम्बोधनम् ॥ स्मृतिरत्नाकरे विष्णुधर्म्मोत्तरम् ।
“मध्याह्नव्यापिनी ग्राह्या श्राद्धे भीष्माष्टमी
तिथिः ।
स्नाने च तर्पणे दाने ग्राह्या सूर्य्योदयी परा ॥
यदा कदाचित् कुम्भांशं गता सूर्य्योदयी परा ।
पूर्व्वस्यामेव कर्त्तव्यं तर्पणं श्राद्धमेव च ॥
यद्येकस्मिन् भवेन्मासि कदाचिन्माकरी द्वयम् ।
भीष्माष्टमी द्वयं चापि तदा ग्राह्या परा तिथिः ॥
ब्राह्मणस्यान्यवर्णानां यः करोत्यौर्द्धदेहिकम् ।
तद्वर्णत्वमसौ याति इह लोके परत्र च ॥”
इति मरीचिवचनन्तु भीष्मश्राद्धेतरपरम् ॥
तथा च स्मृतिः ।
“ब्राह्मणाद्यास्तु ये वर्णा दद्युर्भीष्माय नो जलम् ।
संवत्सरकृतं पुण्यं तत्क्षणादेव नश्यति ॥
अपसव्यं जलदानविधिस्तु प्रकरणबलादपि श्राद्धादिविषय इति श्रीदत्तः ॥ तर्पणमन्त्रस्तु ।
“वैयाघ्रपद्यगोत्राय सांकृतिप्रवराय च ।
अपुत्राय ददाम्येतत् सलिलं भीष्मवर्म्मणे ॥
भीष्मः शान्तनवो वीरः सत्यवादी जितेन्द्रियः ।
आभिरद्भिरवाप्नोतु पुत्रपौत्रोचितां क्रियाम् ॥”
इत्यर्घ्यमन्त्रः । पुत्रपौत्रोचितामित्यभिधानात् पितृकर्म्मरीत्या । ब्राह्मणः पितृतर्पणानन्तरं क्षत्रियस्तु तत्पूर्व्वं तर्पयेत् । इति संवत्सरप्रदीपादयः ॥ इति तिथ्यादितत्त्वम् ॥

भुक्तं, त्रि, (भुज् + कर्म्मणि क्तः ।) भक्षितम् । इत्यमरः । ३ । २ । ११ ॥ (यथा, मनुः । २ । ५५ ।
“पूजितं ह्यशनं नित्यं बलमूर्ज्जञ्च यच्छति ।
अपूजितन्तु तद्भुक्तमुभयं नाशयेदिदम् ॥”
उपभुक्तम् । यथा, रघुः । ४ । ७ ।
“मनुप्रभृतिभिर्मान्यैर्भुक्ता यद्यपि राजभिः ।
तथाप्यनन्यपूर्व्वेव तस्मिन्नासीद्वसुन्धरा ॥”
भावे क्तः ।) भक्षणे, क्ली । इति त्रिकाण्डशेषः ॥ (यथा, रामायणे । २ । ५८ । १२ ।
“आसितं शयितं भुक्तं सूत ! रामस्य कीर्त्तय ।
जीविष्याम्यहमेतेन ययातिरिव साधुषु ॥”)

भुक्तसमुज्झितं, त्रि, (आदौ भुक्तं पश्चात् समुज्झितं परित्यक्तम् । स्नातानुलिप्तवत् समासः ।) पूर्व्वं भुक्तं तत् शेषं पश्चात् समुज्झितं त्यक्तम् । तत्पर्य्यायः । फेला २ । इत्यमरः । २ । ९ । ५६ ॥ पिण्डम् ३ फेलिः ४ । इति भरतधृतरभसः ॥

भुक्तिः, स्त्री, (भुज् + क्तिन् ।) भोजनम् । इति शब्दरत्नावली ॥ भोगः । यथा,—
“भुक्तिस्त्रिपुरुषी सिद्धेदपरेषां न संशयः ।
अनिवृत्ते सपिण्डत्वे सकुल्यानां न सिद्ध्यति ॥
आहर्त्ता शोधयेद्भुक्तिमागमञ्चापि संसदि ।
तत्सुतो भुक्तिमेवैकां पौत्रादिषु न किञ्चन ॥”
इति दायतत्त्वम् ॥
(यथा, मनुः । ८ । २५२ ।
“एतैर्लिङ्गैर्नयेत् सीमां राजा विवदमानयोः ।
पूर्व्वभुक्त्या च सततमुदकस्यागमेन च ॥”)
रविभुक्तिर्यथा,—
“सार्द्धसप्तभसे मेषे वसुः सार्द्धं घटे वृषे ।
दशैव मकरे द्वन्द्वे पलानि प्रतिभास्वरम् ।
कुलीरसिंहप्रमदातुलालिकार्म्मुकेषु च ।
पलान्येकादश तथा रविभुक्तिं प्रचक्षते ॥”
इति ज्योतीरत्नमाला ॥
भोगः । दखल इति पारस्यभाषा । स च प्रमाणचतुष्टयान्तर्गतप्रमाणविशेषः । यथा । लिखिताद्यभावे दिव्यमाह याज्ञवल्क्यः ।
“प्रमाणं लिखितं भुक्तिः साक्षिणश्चेति कीर्त्ति-
तम् ।
एषामन्यतमाभावे दिव्यान्यतममुच्यते ॥”
इति व्यवहारतत्त्वम् ॥
तद्विवरणं यथा । अथ भुक्तिः । तत्र याज्ञवल्क्यः ।
“पश्यतोऽब्रुवतो हानिर्भूमेर्व्विंशतिवार्षिकी ।
परेण भुज्यमानाया धनस्य दशवार्षिकी ॥”
विवादमकुर्व्वतः समक्षं भूस्वामिनः परेणासपिण्डादिना भुज्यमानाया भूमेर्व्विंशतिवर्षनिर्वृत्ता स्वत्वहानिः । अत्र लोकव्यवहारकर्म्मत्वाद्वर्षगणना सावनेन । यथा च विष्णुधर्म्मोत्तरम् ।
“सत्राण्युपास्यान्यथ सावनेन
लोकस्य यत् स्याद्व्यवहारकर्म्म ॥”
तत्रैव ।
“सावने च तथा मासि त्रिंशत् सूर्य्योदयाः
स्मृताः ॥”
इति ॥
विशेषयति व्यासः ।
“वर्षाणि विंशतिं यस्य भूर्भुक्ता तु परैरिह ।
सति राज्ञि समर्थस्य तस्य सेह न सिध्यति ॥”
समर्थस्य बालत्वादिदोषरहितस्य । धनस्य दशवर्षनिर्वृत्ता स्वत्वहानिः । तथा च मनुनारदौ ।
“यत्किञ्चिद्दशवर्षाणि सन्निधौ प्रेक्षते धनी ।
भुज्यमानं परैस्तूष्णीं न स तल्लब्धुमर्हति ॥”
यत्किञ्चिद्धनजातं समक्षमेव स्त्रीबालादिव्यतिरेकेण परैर्दशवर्षाणि भुज्यमानं स्वामी तूष्णीं प्रेक्षते मा भुज्यतामिति प्रतिषेधं न रचयति नासौ तल्लब्धुं योग्यो भवति तत्र तस्य स्वाम्यं नश्यतीत्यर्थः । गोतमः । अजडापौगण्डधनं दशवर्षभुक्तं परैः सन्निधौ भोक्तुरिति । जडो विकलेन्द्रियः । पौगण्डः पूतोऽनुत्पन्नश्मश्रुर्गण्डः कपोलो यस्य सः । तदाह नारदः—
“बाल आषोडशाद्वर्षात् पौगण्डश्चापि
शब्द्यते ॥”
अत्रापौगण्डः प्रकीर्त्तित इति कुल्लूकभट्टेन लिखितम् । तत्पाठेऽपि अपौगण्डस्तु पौगण्ड इति द्विरूपकोषादविरोधः । तस्माद्याजनादिरिव वचनाद्दशवर्षविंशतिवर्षादिकालैर्भोग एव स्वत्वं जनयति । यथा कालप्राप्तिवशेन बीजमङ्कुरं जनयति तरवश्च कुसुममिति । स्वामिना चापरित्यक्तेऽपि शास्त्रोक्तकालीनभोगात् स्वाम्यमन्यस्य भवति । यथा जयेन राज्ञः परराष्ट्रधन इति । एवमेव श्रीकरबालकजोग्लोकभवदेवभट्टशूलपाणिकुल्लूकभट्टचक्रेन्द्ररत्नवर्द्धमानोपाध्यायप्रभृतयः ॥ व्यवहारोऽप्येतादृगेव । एतद्विरुद्धवचनान्यन्यथा व्याख्येयानि । तत्रोपेक्षया स्वत्वहानिं भुक्त्या च स्वत्वमाह नारदः—
“भुज्यमानान् परैरर्थान् यस्तान्मोहादुपेक्षते ।
समक्षं तिष्ठतोऽप्यस्य तान् भुक्तिः कुरुते वशे ॥”
व्यक्तमाह बृहस्पतिः—
“स्थावरं सिद्धिमाप्नोति भुक्त्या हानिमुपेक्षया ।”
उपेक्षया क्षमया । तत्कारणञ्च स्वामिनः सुशीलत्वमहेच्छत्वदयालुत्वादि । एवञ्च विंशतिवर्षात् पूर्व्वं स्वकृतिसाध्यकर्षणपालनादेरुत्पन्नद्रव्य एव स्वत्वम् । एवं दशवर्षात् पूर्व्वं स्वकृतिसाध्यदोहनपालनादेरुत्पन्नदुग्धादौ एव स्वत्वम् । तत्तत्कालपरतस्तु भूमौ गवादिधने च स्वत्वमिति । पूर्व्वं तत्तन्मात्रकभोगे तु चौर्य्यदोषो भवत्येव ॥ * ॥ भोगे तु स्वत्वहानिमाध्यादीनां वारयति पश्यतोऽब्रुवत इत्यभिधाय याज्ञवल्क्यः—
“आधिसीमोपनिःक्षेपजडबालधनैर्विना ।
तथोपनिधिराजस्त्रीश्रोत्रियाणां धनैरपि ॥”
आधिर्बन्धकद्रव्यम् । उपनिःक्षेपः ।
“वासनस्थमनाख्याय समुद्रं यन्निधीयते ॥”
इति नारदोक्तेः ॥
वासनस्थं निःक्षेपाधारभूतसम्पुटादिस्थम् । समुद्रं मुद्रादियुतम् । जडो बुद्धिविकलः । बालोऽप्राप्तषोडशवर्षः । उपनिधिः प्रीत्या भोगार्थमर्पितः । ततश्च आध्यादिभिर्जडादिधनैश्च विना अन्यानि धनानि उक्तभोगकालेन स्वामिनो नश्यन्ति एतानि तु स्वामिनो न नश्यन्ति न वा भोक्तुर्भवन्ति ॥ * ॥ मिताक्षरायां स्मृतिः—
“द्वारमार्गक्रियाभोगजलवाहादिषु क्रिया ।
भुक्तिरेव तु गुर्व्वी स्यान्न दिव्यं न च साक्षिणः ॥”